मङ्क्षुणं, क्ली, (मङ्क्षण । पृषोदरादित्वात् साधुः ।) अङ्कत्राणम् । इति त्रिकाण्डशेषः ॥

मच, इ ङ उच्छ्रायदृप्त्यर्च्चाभासु । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-दृप्तौ अर्च्चायाञ्च सक०-दीप्तौ उच्चीभावे च अक०-सेट् ।) इ मञ्च्यते । ङ मचते । उच्छ्राय उच्चीभावः । इति दुर्गादासः ॥

मच, ङ च कल्कने । दम्भे । शाठ्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-दम्भे शाठ्ये च । अक०-कल्कने-सक०-सेट् ।) कल्कनमिति कल्कं करोतीति णौ रूपं चूर्णीकरणमित्यर्थः । ङ मचते तण्डुलं शिला चकारात् मचि ङ । इति दुर्गादासः ॥

मचर्चिका, स्त्री, (मं शम्भुं चर्च्चनीवेति । चर्च्च + ण्वुल् । टाप् । अत इत्वम् । वस्तुतस्तु रूढ़ोऽयं शब्दः ।) प्रशस्तम् । इत्यमरः ।१।४।२७॥ (यथा, प्रशस्तो ब्राह्मणो ब्राह्मणमचर्च्चिका । "प्रशंसावचनैश्च । २ । १ । ६६ । इति समासः ।)

मच्छः, पुं, (माद्यति सलिलेनेति । मद् + क्विप् । तथा सन् शेते इति । शी + डः ।) मत्स्यः । इति शब्दरत्नावली ॥

मज्जकृत्, क्ली, (मज्जानं करोतीति । कृ + क्विप् । तुगागमश्च ।) अस्थि । इति हेमचन्द्रः ॥

मज्जनं, क्ली, (मस्ज् + ल्युट् ।) स्नानम् । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् ।३।४७ । जाह्नवीमज्जनप्रीतिं न जानन्ति मरुस्थिताः॥")
मज्जा । इति शब्दचन्द्रिका ॥

मज्जसमुद्भवं, क्ली, (मज्जा समुद्भव उत्पत्तिस्थानं यस्य ।) शुक्रम् । इति हेमचन्द्रः ॥

मज्जा, [न्] पुं, (मज्जति अस्थिष्विति । मस्ज् + "श्वन् उक्षन् पूषन् प्लीहन् क्लेदन् स्नेहन् मूर्द्धन् मज्जन्नित्यादि ।" उणा० ।१।१५८ । इति कनिन् निपात्यते च ।) वृक्षादेरुत्तमस्थिरभागः । सार इति ख्यातः । इत्यमरभरतौ ॥ फलमज्जगुणो यथा,—
"यस्य यस्य फलस्येह वीर्य्यं भवति यादृशम् ।
तस्य तस्यैव वीर्य्येण मज्जानमभिनिर्द्दिशेत् ॥"
इति राजवल्लभः ॥

अस्थिमध्यस्थस्नेहविशेषः । तत्पर्य्यायः । कौशिकः २ शुक्रकरः ३ अस्थिस्नेहः ४ अस्थिसम्भवः ५ । इति हेमचन्द्रः । ३।२६ ॥ अस्थिसारः ६ तेजः ७ बीजम् ८ अस्थिजम् ९ जीवनम् १० देहसारः ११ । इति राजनिर्घण्टः ॥ अथ मज्जस्वरूपमाह ।
"अस्थि यत् स्वाग्निना पक्वं तस्य सारो द्रवो घनः ।
यः स्वेदवत् पृथग्भूतः स मज्जेत्यभिधीयते ॥"
अथ मज्जस्थानमाह ।
"स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तरे स्थितः ।"
इति भावप्रकाशः ॥

अस्य गुणाः ।
"बलशुक्ररसश्लेष्ममेदोमज्जविवर्द्धनः ।
मज्जा विशेषतोऽस्थ्नाञ्च बलकृत् स्नेहने हितः ॥"
इति चरकः ॥

मज्जाशब्द आबन्तोऽपि । यथा । शृगालसीमूत्रकशिग्रुसिद्धैः पियालमज्जासहितैस्त्रिति सुश्रुतः ॥ इयमेवाह त्रिकाण्डे भागुरिः ॥
"लज्जावद्राजवन्मज्जा मांससारास्थिसारयोः ।"
इत्यमरटीकायां भरतः ॥

मज्जा, स्त्री, (मज्जतीति । मस्ज् + अच् । अजादित्वात् टाप् ।) अस्थिसारः । इत्यमरटीकायां भरतः ॥ अस्य गुणाः । वातनाशित्वम् । बलपित्तकफप्रदत्वम् । मांसतुल्यगन्धरूपत्वञ्च । कुम्भीरमहिषमज्जागुणाः । मधुरत्वम् । बृंहणत्वम् । बल्यत्वञ्च । मज्जसत्त्वगुणौ यथा । शैत्यम् । उष्णत्वञ्च । इति राजवल्लभः ॥

मज्जाजः, पुं, (मज्जाया जायते इति । जन् + डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥

मज्जारसः, पुं, (मज्जाया रसः ।) शुक्रम् । इति राजनिर्घण्टः ॥

मज्जासारं, क्ली, (मज्जायां सारो यस्य ।) जातीफलम् । इति राजनिर्घण्टः ॥

मज्जूषा, स्त्री, (मज्जन्ति द्रव्याण्यत्र । मस्ज् + ऊषन् । टाप् निपा० ।) मञ्जूषा । इत्यमरटीकायां रायमुकुटः ॥

मञ्चः, पुं, (मञ्चति । उच्चीभवतीति । मचि + घञ् ।) खट्टा । इत्यमरः । २ । ७ । १३८ ॥ कर्णवंशः । माचा इति भाषा ॥ इति हारावली ॥ उच्चमण्डपविशेषः । यथा,—
"दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम् ।
रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते ॥"
इति पुराणम् ॥

मञ्चकः, पुं, (मञ्च + स्वार्थे कन् ।) खट्टा । इति हेमचन्द्रः । ६ । ८३ ॥ (यथा, कथासरित्सागरे । २७ । ९१ ।
"वारिधानी तु कुम्भश्च मार्ज्जनी मञ्चकस्तथा ।
अहञ्च मत्पतिश्चेति युग्मत्रितयमेव नौ ॥")
इन्द्रकोषः । उच्चमण्डपः । इति त्रिकाण्डशेषः ॥

मञ्चकाश्रयः, पुं, (मञ्चकः खट्टादिराश्रयो यस्य ।) मत्कुणः । इति राजनिर्घण्टः ॥

मञ्चमण्डपः, पुं, (मञ्चो मण्डप इव ।) शस्यरक्षार्थकुटिरम् । टं इति भाषा ॥ तत्पर्य्यायः । कुन्दङ्गः । इति हारावली ॥

मञ्जरं, क्ली, (मञ्जयति दीप्यते इति । मनृज् + अरप्रत्ययः ।) मुक्ता । तिलकवृक्षः । वल्ली । इति शब्दरत्नावली ॥

मञ्जरिः, स्त्री, वल्लरिः । इत्यमरः । २ । ४ । १३ ॥ वल्लते वृणोति तरुं वल्लरिः वलल्लि वल्ल ङ वृतौ नाम्नीति अरिः । मञ्जु मनोज्ञतां रातीति मञ्जरिः पूर्व्वेण डिः मनीषादित्वादुकारस्य अकारः पाञ्चोणादीति ईपि मञ्जरी वल्लरी च । वल्लरिर्मञ्जरिर्द्वयोरिति शाब्दिकः ॥ वल्लिर्मञ्जिश्चाच ।
"मञ्जरिर्मञ्जरी मञ्जिर्मञ्जरं त्रिषु वल्लरी ।
वल्लरं त्रिषु वल्लिश्च वल्लरिः पत्रनालिका ॥"
इति हडुचन्द्रः ॥

लतामात्रेऽपि वल्लरिः । अतो बाहुवल्लरीति प्रयोग इति मुकुटादयः ॥ वल्लरीमञ्जर्य्योर्भेदमप्याहुः । यथा अभिनवनिर्गता आयता सुकुमारा सकुसुमा अकुसुमा च मञ्जरिः । यथा चूतमञ्जरिः कदलीमञ्जरिः । वल्लरिः पुनश्चिरभूतापि । यथा तालमञ्जरिः गुवाकवल्लरिरिति इयमेव नवे चिरन्तनेऽपीति कण्वसाङ्गौ । इति भरतः ॥

मञ्जरी, स्त्री, (मञ्जरि । कृदिकारादिति पक्षे ङीष् ।) मुक्ता । तिलकवृक्षः । लता । इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम् । १ । २०७ ।
"निर्गते मञ्जरीकुञ्जादपश्यत् पुरतस्ततः ।
कन्ये नीलनिचोलिन्यौ स केचिश्वावलोचने ॥")
मञ्जरिः । इत्यमरटीकायां भरतः ॥ (यथा, आर्य्यासप्तशत्याम् । ५३३ ।
"वापीकच्छे वासः कण्टकवृतयः सजागरा भ्रमराः ।
केतकविटप किमेतैर्ननु वारय मञ्जरीगन्धम् ॥")
तुलसी । इति राजनिर्घण्टः ॥

मञ्जरीनम्रः, पुं, (मञ्जर्य्यां मञ्जर्य्यवस्थायामपि नम्रः ।) वेतसवृक्षः । इति राजनिर्घण्टः ॥

मञ्जा, स्त्री, (मजि + पचाद्यच् । टाप् ।) छागी । इति त्रिकाण्डशेषः ॥ मञ्जरी । इति हेमचन्द्रः । ११ । २२ ॥

मञ्जिः, पुं, (मजि + इन् ।) मञ्जरी । इति त्रिकाण्डशेषः ॥

मञ्जिका, स्त्री, (मञ्जयतीति । मञ्ज + ण्वुल् । टाप् । अत इत्वञ्च ।) वेश्या । इति हारावली ॥

मञ्जिफला, स्त्री, (मञ्जिर्मञ्जरी फलेऽस्याः ।) कदली । इति त्रिकाण्डशेषः ॥

मञ्जिष्ठा, स्त्री, (अतिशयेनेयं मञ्जिमती । मञ्जिमती + इष्ठः । मतुपो लोपः स्त्रियां टाप् ।) स्वनामख्यातरक्तवर्णलताविशेषः । मजीठ इति हिन्दी भाषा । तत्पर्य्यायः । विकसा २ जिङ्गी ३ समङ्गा ४ कालमेषिका ५ मण्डूकपर्णी ६ भण्डीरी ७ भण्डी ८ योजनवल्ली ९ । इत्यमरः । २ । ४ । ९० ॥ कालमेषी १० काला ११ जिङ्गिः १२ भण्डिरी १३ भण्डिका १४ भण्डिः १५ । इति शब्दरत्नावली ॥ हरिणी १६ रक्ता १७ गौरी १८ योजनवल्लिका १९ वप्रा २० रोहिणी २१ चित्रलता २२ चित्रा २३ चित्राङ्गी २४ जननी २५ विजया २६ मञ्जूषा २७ रक्तयष्टिका २८ क्षत्रिणी २९ रागाढ्या ३० कालभाण्डिका ३१ अरुणा ३२ ज्वरहन्त्री ३३ छत्रा ३४ नागकुमारिका ३५ भण्डीरलतिका ३६ रागाङ्गी ३७ वस्त्रभूषणा ३८ । (पर्य्यायान्तरं यथा,—
"मञ्जिष्ठा विकसा जिङ्गी काला योजनपर्ण्यपि ।